१. हिरण्यानाम्	४।१०।६	अग्निर्हिरिण्यानाम्
२. अन्वीक्षण	४।१६।१	अन्वीचक्षण
३. त्रैष्टुभे	५।२।१	त्रिष्टुभम्
४. प्रथमस्याद्या परा	५।३।१	प्रथमस्या परा
५. मुमुक्रमस्मान्	५।६।८	मुमुक्रम्
६. जुहाति	५।२४।१(नोट)	जुहा

*गु. पुस्तक को मैंने केवल गुरुकुल में ही मिलाकर वापिस देदिया था, अतः उसके पाठ सब स्थलों में नहीं दिये, परन्तु इतना निश्चय कर लिया है कि यह भी क. ख. ग. ङ. वत् ही है।

७. चन्द्रम्	„	चन्द्रमसम्
८. त्रिपदार्षी	५ । २७ । ३	द्विपदार्ची
९. मंत्रोक्तान् देवान्	६ । २ । १	मंत्रोक्त देवान्
१०. त्वष्टा में दैव्यं वचः	६ । ४ । १	त्वष्टा मे दैव्यम्
११. तत्तक देवम्	६ । १२ । १	तत्तक दैवतम्
१२. मनसे चेतसे	६ । ४१ । १	मनसे चेतसे धिये
१३. जायाभि वृध्यै	६ । ७८ । १	जायाभिवृध्यौ
१४. द्वितीया	६ । ६७ । १	तृतीया
१५. पिप्पलीक्षिप्तम्	६ । १०९ । १	पिप्पली
१६. देवत्यम्	७ । ६७ । १	दैवतम्
१७. श्यामश्च	८ । १ । ६	श्यामश्च त्वा
१८. जीवलां नघारिषाम्	८ । २ । ६	जीवलां नघा
य इन्द्र इव देवेषु	९ । ४ । १	य इन्द्र इव
गर्भा भुरिग्जगती	११ । १ । २७	गर्भा जगती

ये ऊपर्य्युक्त निदर्शन हैं जिससे सिद्ध होता है कि वी. आदर्शलेख का अन्य क. ख. ग. ङ. आदर्शलेखों से भेद है । कई स्थलों पर हम ङ और वी लेखों को भी मिला हुआ देखते हैं ।

ङ. वी.		अन्य
अनुष्टुप्		अनुष्टुभः
त्रिपदा आर्ची		त्रिपदे आर्ची
पञ्चम पाठ नहीं	७ । २ ।	पञ्चम पाठ है
ब्रह्मौदनीकम्	११ । १ । १	ब्रह्मौदनिकम्
गर्भापरा चतुष्पात्	११ । ५ । १२	गर्भा चतुष्पात्

देखो पृ० ७२ चतुर्थ टिप्पणी ।

इस प्रकार के स्थलों से सिद्ध है कि कहीं २ वी. ङ का भी पाठ मिलता है।

Whitney (ह्वि०) नें अपने English अथर्वानुवाद में प्रतिसूक्तारम्भ में जो ऋषि, देवता, छन्द दिये हैं वे बृहत्सर्वानुक्रमणिका के दो हस्तलेखों के आधार से दिये हैं। एक London (लंडन) तथा दूसरे Berlin (बर्लिन) के आधार से। उसके पास जो दो आदर्श लेख थे वे भी एक प्रकार के प्रतीत नहीं होते क्योंकि उनमें भी परस्पर भेद है।

पृ० ३५ टिप्पणी ह्वि० E

ह्वि० लं०	पृ०	ह्वि० ब०
आतिमर्त्यम्		आतिमर्त्त्यम्
नहीं	३६	अष्टर्चम्
तृचम्	१६५	द्व्यृचम्

प्रायः ह्वि० का लंडन पाठ क्रम हमारे 'ङ' से बहुत मिलता है। परन्तु बहुत स्थलों पर सब आदर्श लेख आपस में मिलते हैं, कहीं किसी का किसी से भेद और मेल भी हो जाता है। तो भी हम इस निर्णय पर अवश्य पहुंचते हैं कि 'बी' इन सब से विलक्षण है। वी. कुछ २ ङ. से मिलता है यदि वी. को एक शाखा और शेष क. ख. ग. घ. ङ. गु. को भिन्न द्वितीय शाखा मान लें तो कोई बहुत आपत्ति नहीं बैठती।

ग्रंथ काल—इस ग्रंथ के निर्म्माण काल का निर्णय करना अत्यन्त कठिन है। इस में पञ्चपटलिका के उद्धरण, निरुक्त, ऋक्सर्वानुक्रमणी तथा बृहद्देवता के थोड़े बहुत भेद से वाक्य भी आते भी हैं (देखो) पृ० १ की टिप्पणी । पिङ्गल छन्दः शास्त्र के तुलनात्मक वाक्यों को इति कहकर लिखा है। इसके लिये देखो पृ०४ की टिप्पणी। अथर्ववेदीय पञ्चपटलिका का एक उद्धरण पृ० १६२

पर उद्धृत किया गया है। इन प्रमाणों से तो सर्वथा सिद्ध है, कि यह ग्रंथ इन ग्रन्थों से उत्तर काल का है। अथर्ववेदीय परिशिष्टों में चरणव्यूह नामक ४६ वां परिशिष्ट है। उसमें यह वाक्य मिलता है "लक्षण ग्रन्था भवन्ति। चतुरध्यायी, प्रातिशाख्यम्, पञ्चपटलिका, दन्त्योष्ठविधिः, बृहत्सर्वानुक्रमणी चेति।" इस ग्रन्थ प्रमाण से तो यह सिद्ध है ही कि यह ग्रन्थ परिशिष्ट ग्रन्थों से पूर्व कालीन है। इसके निर्म्माण की तिथि का ठीक निर्णय बताना अभी हमारे लिये बहुत कठिन है। आशा है अन्य अथर्ववेदीय सामग्री के मिलने पर इस ग्रन्थ के काल निर्णय का हम वास्तविक रूप से निर्णय कर सकेंगे। कुछ भी सही तो भी यह तो ग्रन्थ की शैली से प्रतीत हो रहा है कि ग्रन्थ पर्य्याप्त पुराना है।

इस ग्रन्थ में एकादश पटल हैं और प्रति पटल में बहुत से स्थानों पर १, २, ३ आदि कुछ पंक्तियों के अनन्तर अंक दिये हुए हैं, जिसे हमनें 'खण्ड' की संज्ञा दी है। पटलों में खण्ड संख्या इस प्रकार से है—

पटल	खण्ड
१	२५
२	२३
३	१०
४	२५
५	१५
६	२२
७	१८
८	१७
९	२३
१०	३४
११	११
	२२३

समग्र

पटल	खण्ड
११	२२३

यह पटल क्रम बृ. सर्वा. लेखक नें अपना स्वतन्त्र ही रक्खा हुआ है। यह पटल क्रम काण्डादियों के आधार से नहीं रक्खा, क्योंकि एक पटल में एक से अधिक काण्ड भी आजाते हैं।

बृहत्सर्वानुक्रमणी के अध्ययन से तो यही पता लगता है कि लेखक नें दश पटलान्त १९ काण्ड युक्त अनुक्रमणी को स्वयं लिखा है और अवशिष्ट २० वें काण्ड को एक भिन्न एकादश पटल बनाकर देदिया है। इस काण्ड की आश्वलायनानुक्रमणी जो कि ऋग्वेदीय प्राचीनानुक्रमणी थी वहां से लेकर यहां उसका पाठ समग्र उद्धृत कर दिया है। इस बात के लिये पुस्तक में ही दो प्रमाण मिलते हैं। एक तो दशम पटलान्त में जिसमें १९वां काण्ड समाप्त होता है, वहां अन्त में इस प्रकार का पाठ दिया है "भृग्वंगिरा ब्रह्मेति भृग्वंगिरा ब्रह्मेति" यहां पर दो वार पाठ देने में लेखक अपनी ग्रंथ समाप्ति की सूचना देता है। यह समाप्ति की एक प्राचीन रीति है। दूसरा एकादश पटलारम्भ में स्पष्ट रूप से लिख दिया है, कि बीसवें काण्ड के ऋषि देवता छन्द खिल मंत्रों को छोड़कर आश्वलायन के अनुसार दिये जायेंगे। "ॐ अथाथर्वणे विंशतितमकाण्डस्य सूक्तसंख्या सम्प्रदायादृषिदैवतछन्दांस्याश्वलायनानुक्रमानुसारेणानुक्रमिष्यामः खिलान् वर्जयित्वा"। इन दोनों प्रमाणों से नितरां सिद्ध है, कि दशम पटल पर्य्यन्त ग्रन्थ तो बृहत्सर्वानुक्रमणी लेखक का अपना है, और एकादशम पटल का समग्र पाठ उसनें भिन्न द्वितीयानुक्रमणी से उद्धृत करके रख दिया है।

ग्रन्थ कर्त्ता।

इस ग्रन्थ के लेखक का वर्णन समग्र पुस्तक में कहीं नहीं, अतः इसके कर्त्ता का लिखना कठिन है। हां सम्भव है अन्य किसी अथर्ववेदीय साहित्य में अनुक्रमणीकार का पता मिल

जावे; परंच वह निर्णय तो अन्य पुस्तकों के मिलने पर ही हो सकेगा। अभी तक तो हम कर्त्ता के नाम सम्बन्ध में कुछ भी नहीं कह सकते।

इस ग्रंथ का सम्बन्ध ।

इस सर्वानुक्रमणी का सम्बन्ध शौनकीय शाखा की अथर्व-संहिता से है, अन्य किसी से नहीं। जो भी प्रतीकादि दी हुई हैं वे सब इस प्रकाशित शाखा शौनकीय से ही मिलती हैं; अतः इस का इस शाखा से सम्बन्ध स्पष्ट है ।

इस पुस्तक में जो काण्ड, सूक्त तथा मंत्रादियों के अंक दिये हैं वे हमनें स्वयं दिये हैं । मंत्रों की प्रतीकोद्धरण में हमनें संधिछेद करके इति को भिन्न किया है और मंत्र को भिन्न लिख दिया है। आदर्शलेखों में मंत्रों के अनन्तर प्रायः बहुत स्थलों में इति है। जहां २ इति है वहां २ मन्त्र में 'विसर्ग' का लोप किया हुआ है संधियें भी की हुई हैं, परञ्च हमनें स्वयं मन्त्रों को विसर्गान्त लिखकर इति पद को भिन्न किया हुआ है। यह केवल पाठकों के सुभीते के लिये किया गया है । काण्ड, सूक्त तथा मंत्रों की प्रतीकों के जो पते हमनें दिये हैं, वे वैदिक यन्त्रालय अजमेर में छपी अथर्वसंहिता के जानना।

इस ग्रन्थ सम्पादन में सब से अधिक सहायता मुझे उन छ आदर्श पुस्तकों से मिली है, जो मुझे भण्डारकर इन्स्टीट्यूट पूना से श्री श्रीपाद कृष्ण बलवैलकर एम० ए० पी० एच० डी० जी की कृपा से मिली हैं, एतदर्थ मैं उनका हार्दिक धन्यवाद करता हूं; क्योंकि यदि ये मूल लेख मुझे न मिलते तो मेरा कार्य्य अपूर्ण होता। अतः इसकी पूर्णता में मैं महाशय बलवैलकर जी का बहुत ही कृतज्ञ हूं।

गु० नामक आदर्श लेख मुझे गुरुकुल कांगड़ी विश्वविद्यालय से पं० इन्द्र जी वेदालंकार की कृपा से प्राप्त हुआ था, अतः वे भी मेरे धन्यवाद के पात्र हैं। पं० भगवद्दत्त जी नें मुझे इस ग्रन्थ सम्पादनार्थ प्रेरणा की थी मैं उनका भी अनुगृहीत हूं।

मुझे पूर्ण आशा है, कि यह ग्रन्थ अथर्ववेदाध्यायीओं को अत्यन्त लाभकर होगा। यदि कोई वेदभक्त इस ग्रन्थ से लाभ उठाकर उस वास्तविक तत्त्वज्ञान को प्राप्त करेगा, तो मैं अपने परिश्रम को सफल समझूंगा।

वैदिकाश्रम,
लाहौर। } रामगोपाल।

ज्येष्ठ, एकादशी, वदि, १९७९ विक्रम।

शुद्धाशुद्धपत्रम् ।

भूमिका

	पृष्ठ । पंक्तिः	
तुलनात्मक	८ । २७	तुल्नात्मक
वेद	२४ । २२	वद
महीधर	२७ । १	महधिर
था	२६ । ३	थी
मिली	३१ । १३	मिला
अक्षीभ्याम्	१७ । १३	अक्षीभ्या
आदित्यम्	२६ । ६	आदित्याम्
भृगुराज्यम्	३१ । १	भृगराज्यम्
मृगारः	३३ । २	भृगारः
अहमिति	३४ । २	अहंमिति
एकादशर्चम्	४० । ६	एकादशर्च
इति तिस्रः	६४ । ५	इतास्त्र
विराट्	७८ । ५	विराट्ट
मारीचिः	७६ । ६	मरीचिः
अनुवाकौ	८१ । ६	अनुवकौ
पूर्वोपरिष्टाद्	८४ । १	पूर्वोपरिष्टद्
बृहत्यनुष्टुबुष्णिक्	१११ । १८	बृहत्यतुष्टुवष्णिक्
जागतानुष्टुब्गर्भा	१११ । १६	जागताट्टनुष्वगर्भा
बभ्रोरध्वर्यो	११३ । १५	बभ्ररध्वर्यो
द्वेषः	१२२ । ८	द्वेत्
यद्यज्ञाया	१२५ । १५	यद्याज्ञाया
दिवमु	१५६ । ६	दिव-
इत्युपरिष्टाद्	१६० । ११	इत्युषरिष्टाद्
विज्ञानाय	१६७ । ५	विज्ञानाय
मंत्रोक्त	१७३ । ४	मत्रोक्त
पंचदश	१७४ । ४	पचदश
गोतमः	१८६ । ५	गोतम

अथर्ववेदीया बृहत्सर्वानुक्रमणिका

ओ३म्

अथ बृहत्सर्वानुक्रमणिका।

[ॐ ब्रह्मवेदं नमस्कृत्य दुर्गां विघ्नेश्वरं गुरुम्।
नृसिंहदक्षिणामूर्त्तिमथर्वाणमभेदतः॥
आविष्कुर्वे ब्रह्मवेदं मन्त्रानुक्रमणीं यथा।
ऋषिदैवतछन्दोभिर्युक्तां पाठफलाप्तये॥*]

ॐ अथाथर्वण गणमन्त्राणामृषिदैवतछन्दांसि। 'यत्काम ऋषिर्मंत्रद्रष्टा वा+भवति यस्यां देवतायामार्थपत्य-मिच्छता स्तुतिः प्रयुज्यते सा देवता तस्य मन्त्रस्य भवति'। छन्दोऽक्षरसंख्यावाच्छेदकमुच्यते। तावत्तत्रछन्दोऽनुक्रमणं,

---

* बी. में श्री गणेशायनमः के आगे "अथर्वणनमः" है औरों में नहीं। ख. में इस स्थान पर "ओं नमो अथर्ववेदाय है। ङ. में इस जगह पर "नमो ब्रह्मवेदाय" है। क, में "नमो ब्रह्मवेदाय,' ब्रह्मवेदे भृगुरंगिरोक्तंबृहत्सर्वानुक्रमणिका लिख्यते। श्री गोपालराम चन्द्राभ्यांनमः।

+ बी. मंत्रदृष्ट्वा. क. ख. ग. घ. ङ. च. मंत्रद्रष्टा वा। तुलना करो निरुक्त ७। १ ।"यत्कामऋषिर्यस्यां देवतायामार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते तद्दैवतः स मंत्रो भवति"। तथा तुलना करो कात्यायन ऋक्सर्वानुक्रमणी। ३। २। तथा देखो बृहद्देवता 'अर्थ मिच्छन्नृषिर्देवं यं यमाहायमस्त्विति प्राधान्येन स्तुवन्भक्त्यामन्त्रस्तद्देव एव सः। १। ६॥

गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तिस्त्रिष्टुब्जगत्यतिजगतीशक्वर्यति-शक्वर्यष्ट्यत्यष्टिधृत्यतिधृतिकृतिप्रकृत्याकृतिविकृतिसंकृत्यभिकृत्युत्कृत्येकविंशति छन्दांसीति । यत्र सर्वाणि छन्दांसीति वक्ष्याम-स्तत्र गायत्र्यादि जगत्यंतं सप्तछन्दांसि प्रकृतानि विजानीयात् । शंतातीयगणस्य–शंतातिश्चन्द्रमाः सर्वाणिछन्दांसि । भैषज्यगण-स्याथर्वा भैषज्यायुरतिजगत्यातिशक्वर्यौ सर्वाणिछन्दांसि च । रुद्र-गणरौद्रगणयोरथर्वा रुद्रोऽतिशक्वरीविराट्शक्वर्यष्टयः सर्वाणि छन्दांसि च । अथ दश गणाः । शान्तिगणस्य ब्रह्मा सोमोऽष्टिः संकृतिः सर्वाणिछन्दांसि च । कृत्याप्रतिहरणगणस्य शुक्रः कृत्या-दूषणोऽतिजगतीशक्वर्यौ सर्वाणिछन्दांसि ॥ १ ॥

चातनगणस्य चातनऋषिरग्निर्देवता सर्वाणिछन्दांसि । मातृनामागणस्य मातृनामा ऋषिर्मातृनामा देवता, त्रिष्टुब्बृहत्य-नुष्टुब्जगत्युष्णिक्शक्वरी छन्दांसि । वास्तोष्पतिगणस्य ब्रह्मा ऋषिर्वास्तोष्पतिर्देवता शक्वर्यतिशक्वर्यौ सर्वाणि छन्दांसि च । पाप्महागणस्य ब्रह्माऋषिः पाप्महादेवता गायत्र्युष्णिगनुष्टुप्पं-क्तिर्जगती छन्दांसि । तक्मनाशनगणस्य भृग्वंगिराऋषिर्यक्ष्मना-शनोदेवता शक्वर्यष्ट्यत्यष्टिधृतयः सर्वाणि छन्दांसि च । दुःस्वप्न-नाशनगणस्य यमऋषिर्दुःस्वप्ननाशनोदेवता सर्वाणि छन्दांसि । आयुष्यगणस्य ब्रह्माऋषिरायुर्देवतातिजगतीशक्वर्यष्ट्यत्यष्टि धृत्य-तिधृति प्रकृतयश्चगायत्र्यादि सप्तछन्दांसि । वर्चस्यगणस्याथर्वा-ऋषिर्बृहस्पतिर्देवता सर्वाणिछन्दांसि ॥ २ ॥

अथ सप्तगणानां स्वस्त्ययनाभयापराजितशर्मवर्मादेवपुरीयचित्रागणपालीवतानामथर्वाऋषिश्चन्द्रमादेवता, शक्वर्यतिशक्वर्यौ सर्वाणिच्छन्दांसि च। आदित्यगणस्यब्रह्माऋषिरादित्यो देवतातिजगतीशक्वर्यष्ट्यतिछन्दांस्यायुष्यगणवत्। पांचपत्यागणस्याथर्वाऋषिरग्निर्वायुःसूर्यश्चन्द्रापोदेवता, गाय युष्णिगनुष्टुब्बृहतीपंक्तयश्छन्दांसि। सलिलगणस्यब्रह्माऋषिरादित्यो देवतातिजगतीशक्वर्यष्ट्यत्यष्टिधृत्यतिधृतिकृतिप्रकृतयश्चगायत्र्यादि सप्तछन्दांसि। विश्वकर्मागणस्याथर्वा ऋषिर्वाचस्पतिर्देवतानुष्टुबुष्णिग्बृहतीपंक्तयश्छन्दांसि। अर्थमुत्थापनगणस्याथर्वाऋषिरग्निर्देवतानुष्टुप्त्रिष्टुबुष्णिग्जगतीपंक्तिर्बृहत्यति छन्दांसि। राज्याभिषेकगणस्य ब्रह्माऋषिर्मृत्युदेवताथर्वांगिरा, आपश्चंद्रमाउष्णिग्जगतीपंक्तिस्त्रिष्टुबनुष्टुब्बृहत्यश्छन्दांसि। अंहोलिंग गणस्याथर्वाऋषिरिन्द्राग्नी चन्द्रवरूणविश्वेदवा देवताः सर्वाणि छन्दांसि॥ ३॥

अथ सूक्तमंत्राणां ऋषिदैवतछन्दांसि।

कां० १। सू० १ तत्र प्रथमं १ 'ये त्रिषप्ता' इति त्रीणि सूक्तान्यानुष्टुभान्येवाथर्वाऽपश्यत्पूर्वं वाचसपत्यं, द्वितीयं चान्द्रमसं पार्जन्यं, तृतीयं पर्जन्यमित्रादिबहुदेवत्यं। पूर्वेण चतुर्ऋचेन वाचस्पतिमेवास्तौत्* वाचाभिवृद्ध्यै, द्वितीयेन चतुर्ऋचेनामृतमयं पर्जन्यं स्वदेवं चन्द्रमसं च। तृतीयेन नवर्चेन मंत्रोक्तान्सर्वान्देवानिति। ४ 'उपहूतो' वाचस्पतिरिति चतुष्पदा विराडुरोबृहती।

* ख. वाचाविवृद्ध्यै।

१।२।३'वृत्तंयदिति' त्रिपदाविराण्नामगायत्री।

१।३।१'विद्माशरस्येति' तृतीयस्य नवर्चस्याद्याः पथ्यापंक्तयः। *'तत्रैकोनानिचृद्द्व्यूनाविराडेकाधिकाभुरिक् द्व्यधिका स्वराडिति। संदिग्धे देवतादित' इति सर्वत्र परिभाष्यते। पराश्वतस्रः +प्रथमः प्रतीकत्वेनानुष्टुभइत्येवं सर्वत्र वक्ष्यमाणेषु मंत्रेषु प्रथम ×प्रतीकिका प्रकृतिरिति॥४॥

÷१।४।-१'अम्बयोयन्तीति' त्रीणि सूक्तान्यपोनप्त्रीयाणि गायत्राणि सोमाद्वैवतानि सिन्धुद्वीपोऽपश्यदंत्यमथर्वा, कृतिः स्वस्थानत्वेनैतैः सूक्तैरप एवास्तौत्। ४'तत्राप्स्वन्तरिति' पुरस्ताद्बृहती॥

१।६।४'शं न आप' इति पथ्यापंक्तिः॥

---

* तु० क० पिङ्गलछन्दः सूत्रम् अध्या० ३। ऊनाधिकेनैकेन निचृद्भुरिजौ।५९। द्वाभ्यां विराड्स्वराजौ।६०। आदितः संदिग्धे। ६१।१ देवतादितश्च॥६२॥

+ गु० प्रातीकल्पेन।

× ग० च० प्रतीका।

÷ इस १।४। सूक्त के १—३ मंत्रों का ऋ० वे० में १।२३।१६—१९ में मेधातिथिः काण्व ऋषि है।

अथर्व० १।५। सूक्त तथा १।६। के २, ३ मंत्र ऋ० वे० १०।९। सूक्त में आये हैं वहां इन मंत्रों का द्रष्टा त्रिशिरास्त्वाष्ट्रः वा सिन्धुद्वीप वा आम्बरीष ऋषि हैं।

१।७।१। 'स्तुवानम्'

१।८।१'इदंहविरिति चैतत्सूक्तद्वयमानुष्टुभं चातनोऽपश्यत्। प्रथमेन सप्तर्चेन स्तुवानं यातुधानमग्निमाह्वयत्ततोग्निः सर्वाभि ऋृग्भिरस्तौत्। 'इदंहविरिति' द्वाभ्यामृग्भ्यां बृहस्पतमिग्नीषोमौ चाप्रार्थयत् । पराभ्यामग्निं ७।५ 'पश्यामत' इति त्रिष्टुप्। ७।३ 'अथेदमग्न' इत्यग्निमिन्द्रप्रार्थना च। ८।४। 'यत्रैषामग्न' इति बार्हतगर्भात्रिष्टुबिति॥ ५॥

१।९। १'अस्मिन् वस्विति सूक्तं' त्रिष्टुभं वस्वादि-नाना मंत्रोक्त देवत्यमथर्वापश्यत्तत्र प्रथमा द्वितीये बहुदेवत्ये। परे द्वे आग्नेय्यौतत आभिर्मन्त्रोक्तान्देवानग्निपुरोगमान्सर्वा-नप्रार्थयच्चतसृभिर्वस्वादिसर्वमिष्टं च॥

१।१०।'१ततोऽयंदेवानामिति' सूक्तमासुरं वारुणं त्रष्टुभं। पूर्वयासुरमस्तौत्पराभिर्वरुणमानुष्टुभावंत्ये द्वे।·३'यदुवक्थेति' ककुम्मती॥

१।११॥'१वषट् ते पूषन्निति' सूक्तं पौष्णं षडच पांक्तमनेन मंत्रोक्तानर्यमादि देवान्नारीसुखप्रसवायाभिष्टूयेष्टश्च सर्वाभिर-प्रार्थयत्। २'चतस्रो दिव' इत्यनुष्टुप्परा चतुष्पदोष्णिगगर्भा ककुम्मत्यनुष्टुप्। ४'नैव मांस इति तिस्रः पथ्यापंक्त्य इत्यनयोः प्रागुक्तर्षिरिति॥ ६॥

१।१२॥ '१जरायुज इति सूक्तं यक्ष्मनाशन देवताकं जागतं भृग्वंगिरा। द्वितीयान्त्यनुष्टुप्॥

१ । १३।१ 'नमस्ते अस्तु' ॥

१ । १४ । १ 'भगमस्या' इति सूक्ते वैद्युते द्वे आनुष्टुभे । प्रथमं वैद्युतं परं वारुणं वोत याम्यं वा । प्रथमेन विद्युतमस्तौत्, द्वितीयेन तदर्थं यममिति । १३ । १ 'भगमस्या' इति ककुम्मती । १३ । ३ 'प्रवतो नपादिति' चतुष्पाद्विराड्जगती । १३ । ४ 'यां त्वा देवा इति त्रिष्टुप्पराबृहतीगर्भा पंक्तिः । १४ । ३ ऐषा ते कुलपा इति चातुष्पाद्विराड् ॥

१ । १५ ॥ १ 'सं सं स्रवन्त्विति' सूक्तमानुष्टुभं सैंधव-मथर्वापश्यत्ततोऽनेन मंत्रोक्तान्देवानप्रार्थयदाद्या, द्वितीया भुरिक् पथ्यापंक्तिरिति ॥ ७ ॥

१ । १६ ॥ १ 'येऽमावास्यामिति' सूक्तमग्नीन्द्रं वारुणं दध-त्यमानुष्टुभं चातनोऽद्राक्षीदनेन मंत्रोक्तान्देवान् सीसमभिष्टूया-प्रार्थयत् । '४यदि नोगामिति' ककुम्मती शेषं प्राकृतम् ॥

१ । १७ ॥ '१अमूर्या' इति सूक्तं योषिद्देवत्यमानुष्टुभं । ब्रह्मा लोहितवाससो मंत्रोक्तदेवता अस्तौत् । आद्या भुरिक् । ४ 'परि वः सिकतावतीति' त्रिपदार्षीगायत्री ॥

१ । १८ ॥ '१निर्लक्ष्म्यमिति' सूक्तं वैनायकमानुष्टुभं द्रविणोदाः । प्रथमोपरिष्टाद्विराड्बृहती । २ 'निररणिमिति' निचृज्ज-गती । ३ 'यत्त आत्मनीति' विराडास्तारपंक्तिस्त्रैष्टुभमिति ॥८॥

१ । १९ । '१मानो विदन्निति' सूक्तमैश्वर्यमानुष्टुभं । ब्रह्मा

प्रथमैन्द्री, द्वितीया *मानुष्येष्ठवीदैवीस्तृतीयारौद्रीया । 'यद्देवत्या तया तामेवास्तौदिति' वैश्वदेवत्या । २'विष्वञ्चो अस्मच्छरव' इति पुरस्ताद्बृहती । ३'यो नः स्व' इति पथ्यापंक्तिः ॥

१ । २० ॥ +१'अदारसृदिति' सूक्तं सौम्यमानुष्टुभमथर्वा, प्रथमात्रिष्टुप् सौम्या । द्वितीया मारुतः । तृतीया मैत्रावारुणी । परा वारुणी । परैन्द्री ॥

१×। २१ ॥ १'स्वस्तिदा विशामिति' सूक्तमैन्द्रमानुष्टुभमनेनेन्द्रप्रार्थनां प्रागुक्तर्षिरकरोत् ॥

१÷। २२ । १'अनुसूर्यमिति' सूक्तं सौर्यमुत मंत्रोक्तं । हरिमादेवत्यमानुष्टुभं । ब्रह्मा ततोऽनेन सूर्य्यं, हरिमाणं, हृद्रोगं चास्तौदनाशयम् ॥

१ । २३ ॥ १'नक्तं जातेति' सूक्तं वानस्पत्यमानुष्टुभमथर्वा श्वेतलक्ष्मविनाशनायानेनासिक्नीमोषधिमस्तौदिति ॥ ६ ॥

---

* सब मूल पुस्तकों में इस पाठ पढ़ने में शंका बनी रही है। मूल अ० वेद १ । १६ । २ में "दैवीर्मनुष्येषवः" पाठ है । हमने जो शुद्ध पाठ [ङ] मूल पुस्तकाधार से जाना है, वह दिया है ।

+इस १।२०। सूक्त का चतुर्थ मंत्र ऋ०वे०१०।१५२।१ में आता है,वहां इसका ऋषि शासोभारद्वाजः,देवता इन्द्र और छन्द निचृदनुष्टुप् है ।

× १ । २१ । इस सूक्त के चारों मंत्र ऋ० वे१० । १५२ सूक्त में आते हैं । स्वस्तिदा मंत्र का ऋ० वे० में थोड़ासा भेद है । ऋ० वे०॥ में इस सूक्त का द्रष्टा शासो भारद्वाजः ऋषि है ।

÷ । २२ ॥ ४ मंत्र का ऋ० १ । ५० । १२ में बहुत थोड़े भेद से आता है, वहां इस का ऋषि प्रस्कण्वः काण्वः है ।

१ । २४ ॥ '१सुपर्णो जात' इति सूक्तमासुरी वनस्पतिदेवत्यमानुष्टुभं । ब्रह्मासुरीमनेनास्तौदिति । २'आसुरी चक्र' इति निचृत्पथ्यापंक्तिः ॥

१ । २५ ॥ '१यदग्निरिति' सूक्तं यक्ष्मनाशनाग्निदैवतं त्रैष्टुभं भृग्वंगिरामंत्रोक्तदेवानस्तौत् । द्वितीया तृतीये विराड्गर्भे । ४'नमः शीतायेति' पुरोऽनुष्टुबिति ॥

१ । २६ । १'आरे साविति' सूक्तमिन्द्रादि बहुदेवत्यं गायत्रं । ब्रह्मा मंत्रोक्तान्देवानभिष्टूयाप्रार्थयत् । २'सखासाविति' त्रिपदा साम्नीत्रिष्टुप् । ४'सुषूदतेति' पादनिचृदुभे एकावसाने ॥

१ । २७ ॥ '१अमूः पार' इति सूक्तं चान्द्रमसमुतेन्द्राणी दैवतमानुष्टुभं । स्वस्त्ययनकामोऽथर्वा । प्रथमा पथ्यापंक्तिः ॥

१।२८॥ १'उपप्रागादेव' इति सूक्तमाग्नेयमानुष्टुभं । चातनः सार्द्धाग्रयाग्निमस्तौत् । *सार्धाभ्यांपरामृग्भ्यां यातुधानीश्चेति । '३याशशापेति' विराट्पथ्याबृहती । '४पुत्रमत्त्विति' पथ्यापंक्तिरिति ॥ १० ॥

१।२९ ॥ १+'अभीवर्तेनेत्य'भीवर्तमणिं सूक्तं षडर्चं ब्राह्मणस्पत्यमानुष्टुभं । वसिष्ठोऽनेन सूक्तेनेमं मणिं सपत्नक्षयणाय, चन्द्रमसो ब्राह्मणस्पत्यमभिष्टूयाप्रार्थयत् ॥

---

* यह पाठ किसी भी हस्तलेख में भली प्रकार से नहीं पढ़ा जाता तथापि ह० ले० के आधार से ही उपर्युक्त पाठ की कल्पना की गई है ॥

+ इस सूक्त के आदि के तीन मंत्र अत्यन्त थोड़े भेद से ऋ० १०। १७४ में आते हैं वहां ऋषि अभीवर्त्तः और देवता राज्ञः स्तुतिः है

१।३०।१ 'विश्वेदेवाः' इति सूक्तं वैश्वदेवं त्रैष्टुभमायुष्कामोऽथर्वा सर्वान् वस्वादिदेवान् सर्वाभिर्ऋग्भिरस्तौत्। ३'ये देवाः, इति शाक्वरगर्भाविराड्जगती ॥

१।३१।१'आशानामाशापालेभ्यः' इति सूक्तमाशा*पालीयं, वास्तोष्पत्यमानुष्टुभं। ब्रह्मानेनाशापालान्वास्तोष्पतीन् सूक्तेनास्तौत् ३'अस्रामस्त्वा' इति विराट्त्रिष्टुप्। ४'स्वस्तिमात्रे' इति परानुष्टुप्त्रिष्टुबिति ॥ ११ ॥

१।३२।१'इदंजनासः' इति ब्रह्मसूक्तं द्यावापृथिवीयमानुष्टुभमनेन तदेवास्तौदिति-। +सर्वत्रानुक्तार्षसूक्तेषु प्रागुक्तर्षिरिति विजानीयादनुक्त ×क्रियेष्वपश्यात्तन इति च सर्वत्र परिभाष्यते। या÷यद्देवत्या तया तामेवास्तौदिति पारिभाषिकं सूक्तमिति च ·।·सर्वत्रावगच्छेदिति शास्त्रप्रकृतिराग्रंथ परिसमाप्तेः। २'अन्तरिक्ष आसाम्' इति ककुम्मतीति ॥

१।३३।१'हिरण्य वर्णाः' इति सूक्तं चान्द्रमसमाप्यमुत त्रैष्टुभं। शंतातिः सर्वेण सूक्तेन सर्वकारणं आप एवेति विज्ञाय ता .×.अस्तौदिति ॥

---

* ख. ग. ङ. च. लीये ॥

+ अनुक्त ऋषि ॥

× ख. क्रियेष्वपश्यत्तत, च. क्रियेष्वपस्थातन ॥

÷ बी. या यद्दचावत्या ॥

·।· बी. सर्वत्र नहीं ॥

.×. समग्र. ह० लेखों में 'विज्ञातास्तौत्' पाठ है परन्तु हमारी सम्मति में यह पाठ अशुद्ध लिखे हुए हैं, शुद्ध करके व्याकरण के नियम से पाठ हमने मूल में दिया है ॥

१ । ३४ । १'इयं वीरुत्।' इति *मधुकमणिसूक्तं पञ्चर्चं वानस्पत्यमानुष्टुभमथर्वा मधुवनस्पतिमस्तौत् ॥

१।३५। १'यदाबध्नन्' इति हैरण्यमैन्द्राग्नमुत वैश्वदेवं जागतं ततोऽनेन सूक्तेन हिरण्यमेवास्तौत्। यच्छतानीकाय राज्ञे दक्षेः पुत्रा अबध्नस्तँत्र आत्मनि बध्नाम्यायुष्कामः। ४+'विश्वेदेवाः'इति '४समानां मासाम्' इत्यनुष्टुब्गर्भा चतुष्पदात्रिष्टुप् 'तत्ते ×बध्नाम्यायुषे १वर्चसेबलाय'इति शाक्वरस्तथा ३÷'अस्मिन्तद्दक्षमाणः' इति ॥ १२ ॥

---

* बी. क. ग. गु. मदुघ, ख. ङ. च. मधुघ. हमने दोनों ही पाठ नहीं दिये, कौशि. १ । ३४ में इसी सूक्त पर सूत्र लिखते हुए 'मधुक मणिमौक्षेऽपनीय इयं वीरूत्' पाठ में 'मधुकमणि' आया है, यही ठीक जान मूल में दिया है ॥

+ यह प्रतीक इस सूक्त में किसी मंत्रारम्भ की नहीं, हां चतुर्थ मंत्र उत्तरार्ध में यह पद आया है ॥

× यह प्रतीक भी प्रथम मंत्र के उत्तरार्ध के आरम्भ की है ॥

÷ यह भी प्रतीक नहीं, परन्तु तृतीय मंत्र के उत्तरार्ध में यह पाठ आया है। मूल में इस सूक्त में 'समानामासामिति इस प्रतीक के विना अन्य सब प्रतीक आरम्भ की नहीं है, यह भी बात यहां चिन्तनीय ही है ॥

*अथ द्वितीयं काण्डम् ।

२ । १ । १ 'वेनस्तत्' इति प्रभृतिराकाण्डपरिसमाप्तेः पूर्वकाण्डस्य चतुर्ऋचप्रकृतिरित्येवमुत्तरोत्तरकाण्डेषु षष्ठं यावदेकैका तावत्सूक्तेष्वृगिति विजानीयात् । १ 'वेनस्तत्' इति त्रैष्टुभं ब्रह्मात्मदैवतं वेनोऽपश्यत् । ततोऽनेन सूक्तेन तदेवास्तौदिति । +३ 'स नः पिता' इति जगती ॥

२ । २ । १ 'दिव्यो गन्धर्वः' इति त्रैष्टुभं । मातृनामा गन्धर्वाप्सरो देवत्यं मातृनामानेन सूक्तेन मंत्रोक्तान् गन्धर्वाप्सरसो देवता अस्तौत् । ४ 'अभ्रिये दिद्युत्' इति त्रिपाद्विराण्नाम गायत्री । १ 'दिव्यो गन्धर्वः' इति विराड्जगती' ५ 'याः क्लन्दाः' इति भुरिगनुष्टुबिति ॥ १३ ॥

२ । ३ । १ 'अदोयत्' इति भैषज्यायुर्धन्वंतरि दैवतं षडर्चमानुष्टुभमंगिरा अपश्यदनेन मंत्रोक्तान् देवानस्तौत् । ६ 'शं नो भवन्तु' इति त्रिपात्स्वराडुपरिष्टान्महाबृहतीति ॥

२ ।४। १ 'दीर्घायुत्वाय' इति चान्द्रमसमुतजंगिडदेवताकमानुष्टुभं षडर्चमथर्वानेन सूक्तेन जंगिडमणिमस्तौदिति । प्रथमा विराट्प्रस्तारपंक्तिरिति ॥

---

* यह पाठ हमारा है ॥

+ थोड़े भेद से यह मंत्र ऋ० वे० १० । ८२ । ३ में आया है वहां ऋषि विश्वकर्मा भौवनः है ॥

२।५। १*'इन्द्र जुषस्व' इति सप्तर्चं त्रैष्टुभमैन्द्रं भृगुरथर्वाण इन्द्रमनेन सूक्तेनाह्वयदाद्यया पराभिश्च सर्वाभिस्तमस्तौदिति। +य उपरिष्टाद्बृहत्यौ तत्र प्रथमा निचृदुत्तरा विराडिति। ३'इन्द्रस्तुराषाट्'इति विराट्पथ्याबृहती। ४'आ त्वा विशन्तु सुतासः'इति जगती पुरोविराडिति ॥ १४ ॥

२।६।१'समास्त्वाग्ने' इत्याग्नेयं त्रैष्टुभंसम्पत्कामः शौनकोऽनेन सूक्तेनाग्निमस्तौदिति। ४'क्षत्रेणाग्ने स्वेन'इति चतुष्पदार्षीपंक्तिः परा, विराट्प्रस्तारपंक्तिरिति ॥

२।७। १'अघ द्विष्टा' इति भैषज्यायुर्वनस्पतिदेवत्यमानुष्टुभमथर्वा प्रथममनेन सूक्तेन दूर्वामस्तौदिति। प्रथमा भुरिक्। ४'परि मां परि मे' इति विराडुपरिष्टाद्बृहती ॥

२।८।१'उदगातां' ॥

२।९।१'दशवृक्ष' इति च द्वे इमे सूक्ते वानस्पत्ये यक्ष्मनाशन दैवते चानुष्टुभे भृग्वंगिरा आभ्यां मंत्रोक्तदेवते अस्तौत्। २।८।३'बभ्रोरर्जुन काण्डस्य' इति पथ्यापंक्तिः, परा विराट्, परा निचृत्पथ्यापंक्तिः। १'दशवृक्ष मुञ्च' इति विराट्प्रस्तारपंक्तिरिति ॥ १५ ॥

---

* इस २।५। सूक्त के ५—७ मंत्र ऋ० वे० १।३२।१—३ में आते हैं वहां इनका ऋषि हिरण्यस्तूप आङ्गिरस है ॥

+ ठीक पाठ पढ़ा नहीं जाता क. गु. में 'त्यं त्ये' पाठ है ॥

२।१०।१'क्षेत्रियात् त्वा' इति सूक्तं प्रागुक्तर्षिगणं निर्ऋति द्यावापृथिव्यादिनाना देवत्यमष्टर्चं। प्रथमा त्रिष्टुप् तया निर्ऋतिमस्तौद्ब्रह्मणा सह सर्वाभिर्द्यावापृथिवी । द्वितीययाग्निमद्भिः सह पूर्वपादेनोत्तरेण सहौषधीभिः सोमं। तृतीयया पूर्वपादेन वातमुत्तरेण चतस्रो दिशः। पराभिर्वातपत्नीः,सूर्यं यक्ष्मं, निर्ऋति प्रभृतीं निचेति। २'शं ते अग्निः' इति सप्तपादष्टिः । ३'शं ते वातः', ४'इमा या देवीः', ५'तासु त्वा',८'सूर्यमृतं',७'अहा अरातिम्' इति, प्रत्यृचं सप्तपादो धृतयः।६'अमुक्था यक्ष्मात्' इति सप्तपादत्यष्टिः। *८'एवाहं त्वाम्' इति द्वावौष्णिहौ पादाविति ॥ १६ ॥

२ । ११ । १'दूष्या दूषिरसि' इति कृत्यापरिहरण सूक्तं कृत्यादूषण देवत्यं । शुक्रोऽनेन स्राक्त्यमणिमेव सर्वरूपमित्यस्तौत्। प्रथमा चतुष्पदा विराड् गायत्री । २'स्रक्त्योऽसि' इति चतस्रस्त्रिपदाः परोष्णिहः । ४'सूरिरसि' इति पिपीलिकमध्या निचृदिति ॥ १७ ॥

२ । १२ । १+'द्यावापृथिवी उरू' इति सूक्तमष्टर्च नाना देवत्यं। त्रैष्टुभं भरद्वाजः प्रथमया द्यावापृथिवी अन्तरिक्षमुरुगाय-

---

* गु. में यहां यह अधिक पाठ है जो कि अन्यों में २।१२। के आरम्भ में है। 'स द्यावा पृथिवी उर्वीतिस्तत्कमष्टर्चं नाना देवत्यं त्रैष्टुभं भरद्वाजः प्रथमया सर्पदित्यष्टिः' ॥

+ इस सूक्त का छटा मंत्र थोड़े से भेद से ऋ० वे० ६।५२।२ में है॥

मस्तौत् । द्वितीयया देवान्, परयेन्द्रं, परयादित्यवस्वंगिरः पितॄन् सौम्यान्, परया ब्रह्मविराट्तपोऽग्न्यो मरुतः,परया यमसदनात्, परया ब्रह्मा,परयाग्निमिति । तत्र २'इदं देवाः' इति जगती । ७'सप्त प्राणान्' इति द्वे अनुष्टुभौ । शेषः प्रतीक इति ॥ १८ ॥

२ । १३ । '१ आयुर्दा' इति बहुदेवत्यमुताग्नेयं । त्रैष्टुभमथर्वाद्ययाग्निमस्तौत् । पराभ्यांबृहस्पतिं *चन्द्रमसे वासः प्रार्थयत् । पराभ्यामायुर्विश्वान्देवान् । ४'एह्यश्मानम्' इत्यनुष्टुप् । ५'यस्य ते वासः' इति विराड्जगती ॥

२ । १४ । १'निस्सालाम्' इति षडर्चमानुष्टुभं । शालाग्निदेवत्यमुत मंत्रोक्तदेवताकं चातनः सर्वाभिर्ऋग्भिर्मन्त्रोक्तान् देवान् अग्निभूतपतीन्द्रानस्तौत् । '२निर्वः' इति भुरिक् । ४'भूतपतिः'-इत्युपरिष्टाद्विराड्बृहतीति ॥ १६ ॥

२ । १५ । १'यथाद्यौः' ॥

२ । १६ । १'प्राणापानौ' ॥

२।१७।१'ओजोसि' इति त्रीणि प्राणापानायुर्देवत्यानि नानाछन्दांसि । ब्रह्मा प्रथमं षडर्चं त्रिपाद्गायत्रं तेन प्राणमप्रार्थयत् । परे द्वे एकावसाने । तत्र द्वितीयं सप्तर्चं तस्याद्याः षडेकपदा आसुरी त्रिष्टुभोऽन्त्यासुर्युष्णिक् प्रथक् प्रथमेन प्रत्यृचं मंत्रोक्तान्देवान् स्वायुरेवाप्रार्थयत् । परेणौजः प्रभृतीनि प्राणायुश्च ।

---

* बी. चंन्द्रसो. क. चन्द्रमासा ॥

१६।१ 'प्राणापानौ' इत्येकपदासुरी त्रिष्टुप्*। द्वितीयैकपदासुर्युष्णिक्। पराचैकपदासुरी त्रिष्टुप् । ४'अग्ने वैश्वानर' इति÷[द्वे] द्विपदे आसुरी गायत्र्यावाद्याद्य +ऋतुवर्णः पराद्यो वसुवर्ण इति ॥

२ । १८ । 'भ्रातृव्यक्षयणम्' इत्याग्नेयं द्वैपदं साम्नावार्हतं चातनः सपत्नक्षयकामोऽनेन सूक्तेन सपत्नक्षयणीः समिध आधायाग्निं प्रार्थनीयमप्रार्थयच्चेति ॥ २० ॥

२ । १९ । १'अग्नेयत्' इति पंचसूक्तानि त्रिपाद्गायत्राणि । प्रतिसूक्तं पंच पंचर्चान्येकावसानानि ×पांचपत्यान्यथर्वा । प्रथममाग्नेयं, द्वितीयंवायव्यं, तृतीयंसौर्यं च, तुरीयंचान्द्रं, पञ्चममाप्यमिति । प्रथमेनाग्निमस्तौत् द्वितीयेन वायुं, तृतीयेनसूर्यं, चतुर्थेन चान्द्रमसं, पञ्चमेनापइति। तत्राद्यानां चतुर्णामाद्याश्चतस्रो निचृद्विषमा गायत्र्योऽन्त्या भुरिग्विषमा । पञ्चमस्याद्याश्चतस्रः समविषमा अंत्या स्वराड्विषमा। सर्वा एव संगताः पंच विंशतिस्त्रिपाद इति ॥

२ । २४ । १'शेरभक' अष्टर्चमायुष्यं पांक्तं । ब्रह्मा सर्वाभिः प्रत्यृचं मंत्रोक्तदेवतामृग्भिरस्तौदिति । प्रथमे द्वे पुरउष्णिहे, परे द्वे पुरो देवत्ये पांक्ते, सर्वा एताश्चतस्रो वैराजः। पराः पञ्चपदाः

---

* मूल ग्रंथ 'भः' ॥

÷ मूल ग्रंथों में (द्वे) नहीं बंधनी में स्वयं दिया है ॥

+ यह पाठ ठीक नहीं पढ़ा जाता ऋ, और ऋ, में संशय था हमने ऋ. पाठ दिया है ॥

× ह्वि० कौशिक सूत्र ४७।८ के आधार से 'पंचापत्यानि' पाठ मानता है ॥

पथ्यापंक्तयोऽत्राद्ये भुरिजावुत्तरे निचृदाविति । ५'जूर्णि चतुष्पदा बृहत्यः प्रथमा वर्ज तिस्रो भुरिज इति ॥ २१ ॥

२ । २५ । १'शं नः' इति वानस्पत्यमानुष्टुभं, चातनोऽनेन पृश्निपर्णीमोषधीमस्तौत् । ४'गिरिमेनाँ' इति भुरिक् ॥

२ । २६ । १'एह यन्तु' इति पशव्यं त्रैष्टुभं सवितानेन पशूनभ्यस्तौदिति । ३'सं सं स्रवन्तु' इति उपरिष्टाद्विराड्बृहती । ४'सं सिञ्चामि' इति द्वे अनुष्टुभौ । पूर्वा तत्र भुरिक् ॥

२ । २७ । १'नेच्छत्रुः' इति सप्तर्चं वानस्पत्यमानुष्टुभं कपिञ्जलः ॥ प्रथमयारिनिरोजस्त्वमप्रार्थयन्मंत्रोक्तमौषधिं, पराभिश्चतसृभिश्चौषधिमस्तौत् । परया रौद्र्या रुद्रं, परयैन्द्रमिति ॥

२ । २८ । १'तुभ्यमेव' इति त्रैष्टुभं । जरिमायुर्देवतं । शंभूः प्रथमया जरिमाणमभिष्टूयाप्रार्थयदायुश्च । द्वितीयया मित्रावरुणौ, परया पुनर्जरिमाणं । पराभिर्द्यावापृथिव्यादिदेवानायुश्च । प्रथमा जगत्यंत्या भुरिगिति ॥ २२ ॥

२ । २९ । १'पार्थिवस्य' इति सप्तर्चं त्रैष्टुभं बहुदेवत्यमथर्वा - प्रथमा वैश्वदेवी, तया देवानायुष्यमात्मनेऽप्रार्थयत्द्वितीयायाः प्रथमेनायुर्जातवेदसं, परेण पादेन प्रजां त्वष्टारं, तृतीयेन सवितारं धनं शतायुश्च, परयेन्द्रं सौप्रजास्त्वादि, पराभ्यां द्यावापृथिव्यौ विश्वान्देवान् मरुतश्चापश्च, परयाश्विनौ, परयेन्द्रमस्तौदिति च शिष्यते । प्रथमानुष्टुप् । ४'इन्द्रेण दत्तः' इति पराबृहतीनिचृत्प्रस्तारपंक्तिः ॥

२ । ३० । १'यथेदम्' इति प्रजापतिराश्विनमानुष्टुभं कामिनी मनोऽभिमुखीकरणकामः प्रथमया भूतृणं दृष्टान्तेन मनो-मंथनमादध्यात् । परयाश्विनौ, पराभिस्तदर्थमोषाधिमस्तौदंत्यया दम्पती परस्परंमनोग्रहणमाकुरुताम् ॥

२ । ३१ । १'इन्द्रस्य या' इति महीदेवत्यमुत चान्द्रमसमानु-ष्टुभं काण्वः । प्रथमया महीमस्तुवत्, पराभिः सर्वाभिश्च क्रमि-जम्भनमादध्यादिति । २'दृष्टमदृष्टम्' इत्युपरिष्टाद्विराड्बृहती । परार्षी त्रिष्टुप् । ४'अन्वान्त्यम्' इति प्रागुक्ता बृहती । ५'ये क्रिमयः' इति प्रागुक्ता त्रिष्टुप् ।

२ । ३२ । १'उद्यन्नादित्यः' इत्यादित्यदेवत्यं षडृचमानुष्टु-भमनेनोक्तऋषिरुक्तक्रियामकरोदिति । प्रथमा त्रिपाद्भुरिग्गा-यत्री । ६'प्र ते शृणामि शृंगे' इति चतुष्पान्निचृदुष्णिगिति ॥२४॥

२ । ३३ । १'*अक्षीभ्या ते' इति यक्ष्मविवर्हणं सप्तर्चं चान्द्रमसमायुष्यमानुष्टुभं । ब्रह्मानेन सर्वेण सूक्तेन सर्वांगतो यक्ष्मनिर्गमनमादध्यात् । ५'उरूभ्यां ते' इत्युपरिष्टाद्विराड्बृहती । ३'हृदयात्ते' इति ककुम्मती । ४'आन्त्रेभ्यः' इति चतुष्पाद्भुरिगु-ष्णिक् । ६'अस्थिभ्यः' इत्युष्णिग्गर्भा निचृदनुष्टुप् । ७'अङ्गे अङ्गे' इति पथ्यापंक्तिः ॥

---

* इस २।३३ सूक्त के १,२,४,५,७ मंत्र ऋ०वे० १०।१६३ सूक्त में आते हैं। १, २, ५ मंत्र तो वैसे के वैसे ही हैं; अन्य ४, ७ मंत्र कुछ भेद से आये हैं। वहां इन मंत्रों का ऋषि 'विवृही काश्यपः' है ॥

२ । ३४ । १'य ईशे' इति पाशुपत्यं पशुभागकरणं त्रैष्टुभमथर्वा । प्रथमया पशुपतिमभिष्टूय परा*पश्चाप्रार्थयदंततो द्वितीयया देवान्, परयाग्निं विश्वकर्म्माणं, परया वायुं प्रजापतिमंत्यया यज्ञियं पशुमाशिषा प्राणुदत् ॥

२ । ३५ । १'ये भक्षयन्तः' इति वैश्वकर्माणं त्रैष्टुभमंगिरा सर्वेणानेन सूक्तेन तं विश्वकर्माणमेवास्तौत् । प्रथमा बृहतीगर्भा । ४'घोरा ऋषयः', ५'यज्ञस्य चक्षुः, इति भुरिजौ ॥

२ । ३६ । १'आ नो अग्ने' इत्यष्टर्चमग्नीषोमीयं त्रैष्टुभं पतिवेदनः प्रथमयाग्निमस्तौत्, द्वितियया सोमादीन् देवान्, परयाग्नीषोमौ, परया त्विन्द्रं, परया सूर्यं, परया धनपतिं, परया हिरण्यादिभगं चांत्ययौषधिमप्रार्थयदिति । प्रथमा भुरिक् । २'सोमजुष्टं' ५'भगस्य नावम्' इति तिस्रोऽनुष्टुभोऽन्त्या निचृत्पुरउष्णिगिति॥२५

+इति ब्रह्मवेदोक्तमंत्राणां बृहत्सर्वानुक्रमणिकायां प्रथमः पटलः समाप्तः ॥

---

* यह पाठ सब मूल लेखों में पढ़ना कठिन है। घ. ङ. में "परायश्च" पढ़ा जाता है। अन्यों में जो पाठ ऊपर दिया है वैसा ही पढ़ा जाता है॥

+ गु. इत्यथर्ववेदे अनुक्रमणिकायां प्रथमः पटलः समाप्तः सम्वत् १९२२ ना कार्त्तिक वादि १३॥ ङ. इति ब्रह्मवेदोक्त अनुक्रमणीकायां प्रथमः पटलः ॥

*अथ तृतीयं काण्डम् ।

३ । १ । १ 'अग्निर्नः' इति द्वे सेनामोहने बहुदेवत्ये त्रैष्टुभेऽथर्वात्र +षड्डृचं प्रकृतिरन्याविकृतिरिति विजानीयात् । प्रथमयाग्निमस्तौत् । द्वितीयया ×मरुतः, पराभिरिन्द्रं, परस्य प्रथमाभ्यामग्निं, पराभ्यामिन्द्रं, परया द्यां, परया मरुत इति पूर्वस्य तृतीयान्त्ये ॥

३ । २ । २ 'अयमग्निरसूमुहत्' इति तिस्रोऽनुष्टुभः । ३।१।५ 'इन्द्रसेनाम्' इति विराट्पुरउष्णिक् । ३ । १ । २ 'यूयमुग्रा' इति विराड्गर्भा भुरिक् ॥

३ । ३ । १ 'अचिक्रदत्' इति नाना देवत्यमुताग्नेयं त्रैष्टुभमनेन मंत्रोक्तान्देवानस्तौत् । ३ 'अद्ध्वयस्त्वा राजा' इति चतुष्पदा भुरिक्पंक्तिः । ६ 'ह्वयन्तु' इति द्वे आनुष्टुभे ॥

३ । ४ । १ 'आत्वा गन्', ५ । १ 'आयमागन्' इति द्वे सूक्ते, आद्यं सप्तकं द्वितीयमष्टकं । पूर्वमैन्द्रमुत्तरं सौम्यं । पूर्वेणेन्द्रमुत्तरेण पर्णमणिमुक्तार्षिरस्तौदिति । ४ । ४ 'अश्विना त्वा', ४ । ५ 'आ प्र द्रव' इति द्वे भुरिजौ । ४ । १ 'आत्वा गन्' इति जगती ॥

३ । ५ । २ 'मयि क्षत्रम्' इति द्वे, । ५ 'आ मारुक्षत्' इति तिस्रोऽनुष्टुभः । १ 'आयमगन्' इति पुरोऽनुष्टुप्त्रिष्टुप् । ८ 'पर्णोसि' इति विराडुरोबृहतीति ॥ १ ॥

---

* यह लेख हमारा है ।

+ मू० ले० षडर्चं ।

× मूल लेखों में विसर्ग नहीं ।

३ । ६ । १ 'पुमान् पुंसः परिजातः' इत्यष्टर्चं वानस्पत्याश्वत्थदेवत्यमानुष्टुभं जगद्बीजं पुरुषोऽनेने सूक्तेनारिच्चियायामुं मंत्रोक्तं देवमश्वत्थमेवास्तौदिति ॥

३ । ७ । १ 'हरिणस्य' इति सप्तर्चं यक्ष्मनाशनदेवतमुत बहुदेवत्यमानुष्टुभं, भृग्वंगिरा आद्याभिस्तिसृभिर्हरिणमस्तौत् । परया तारके, परयापः, पराभ्यां यक्ष्मनाशनं । ६ 'यदासुतेः' इति भुरिक् ॥

३ । ८ । १ 'आयातु मित्रः' इति मंत्रमुत वैश्वदेवं त्रैष्टुभमथर्वा चतसृभिर्मित्रादीन् विश्वान्देवानस्तौत् । पराभ्यां सांमनस्यमिति । २ 'धाता रातिः', ६ 'अहं गृभ्णामि' इति जगत्यौ । ५ सं वो मनांसि' इत्यनुष्टुप् । ४ 'इहेदसाथे' इति विराड्बृहतीगर्भाचतुष्पादिति ॥२

३ । ९ । १ 'कर्शफस्य' इति द्यावापृथिवीयमुत वैश्वदेवमानुष्टुभं वामदेवः । ४ 'येनाश्रवस्यवः' इति चतुष्पान्निचृद्बृहती । अंत्या भुरिक् ॥

३ । १० । *१ 'प्रथमा ह' इति त्रयोदशर्चमाष्टक्यमानुष्टुभमथर्वा सर्वाभिरेकामेवाष्टकामस्तौत् । ४ 'इयमेव सा या' इति तिस्रः, १२ 'एकाष्टका' इति त्रिष्टुभः । ७ 'आ मा पुष्टे च' इति त्र्यवसाना षट्पदा विराड्गर्भाति जगती ॥

---

* ३ । १० । १ मंत्र का उत्तरार्ध ऋ० वे० ४ । ५७ । ७ में देखो ।

३ । ११ । *१'मुञ्चामित्वा' इत्यष्टर्चमैन्द्राग्नमायुष्यं त्रैष्टुभं ब्रह्मा यक्ष्मनाशनदेवत्यमुत भृग्वंगिराश्चोभौ मंत्रोक्तदेवाननेना-स्तुतामिति । ४'शतं जीव',८'अभित्वा' इति जगत्यौ । पूर्वा शक्करीगर्भा, परा त्र्यवसाना षट्पदाबृहतीगर्भा । ५'प्र विशत' इति द्वे आनुष्टुभौ । ७'जरायै त्वा' इति उष्णिग्बृहतीगर्भापथ्यापंक्तिरिति ॥ ३

३ । १२ । १'इहैव ध्रुवाम्' इति नवर्चं शालासूक्तं वास्तोष्पति-शालादैवतं त्रैष्टुभं ब्रह्मा सर्वेणानेन शालामस्तौत् । ३'धरुण्य-सि शाले' इति बृहती । ६'ऋतेन' इति शक्करीगर्भाजगती । ७'एमाम्' आर्ष्यनुष्टुप् । द्वितीया विराड्जगती । ८'पूर्णं नारि' इति भुरिक् । ९'इमा आपः' इत्यनुष्टुप् ॥

३ । १३ । १'यददः' इति सप्तर्चं वारुणमुत सिन्धुदैवत-मानुष्टुभं भृगुस्ता अनेनास्तौदिति । प्रथमा निचृत् । ५'आपो भद्रा' इति विराड्जगती । परा निचृदनुष्टुबिति ॥ ४ ॥

३ । १४ । १'सं वः' इति नाना देवत्यमुत गोष्ठदेवताकमा-नुष्टुभं ब्रह्मा मंत्रोक्तान्देवानस्तौत् । अंत्यार्षीत्रिष्टुप् ।

---

* ३ । ११ । सूक्त के आरम्भ के २ मंत्र अक्षरशः और ३, ४ थोड़े भेद से ऋ० वे० १० । १६१ । १–४ में मिलते हैं । वहां इन का ऋषि यक्ष्मनाशनः प्राजापत्यः है । ३ । ११ के यही आरम्भ के ४ मन्त्र अक्षरशः इसी अथर्ववेद के २० । ९६ । ६–९ में भी मिलते हैं, वहां भी इनका ऋषि ब्रह्मा ही है ।

३ । १५ । १'इन्द्रमहम्' इत्यष्टर्चं त्रैष्टुभं वैश्वदेवमुतैन्द्राग्नं पण्यकामोऽथर्वा प्रथमया प्रागिन्द्रमस्तौत्परयापथः, *परयाग्निं, +परया प्रपणमाग्निविक्रयं च, परया देवानग्निं च धनं प्रार्थयन्, उत्तरया देवानिन्द्रं प्रजापतिं सवितारं सोमाग्निं धनरुचिं चेति, ८ परया विश्वानरं जातवेदसमिति । प्रथमा भुरिक् । ४'इमामग्ने' इति त्र्यवसाना बृहतीगर्भा षट्पदाविराडत्यष्टिः । ५'येन धनेन' इति प्रथमा विराड्जगती । ७'उप त्वा नमसा' इत्यनुष्टुप्× ८'विश्वाहा ते' इति निचृदिति ॥ ५ ॥

३ । १६ । १÷'प्रातरग्निम्' इति प्रातःसूक्तं बार्हस्पत्यमुत बहुदेवत्यं त्रैष्टुभमथर्वा । प्रथमा बहुदेवत्यार्षी जगती तयाग्नीन्द्रादीन्मंत्रोक्तान् देवानाह्वयत् । २'प्रातर्जितम्' इति पंचभगदेवत्यास्तत्र, ४'उतेदानीम्' इति भुरिक्पंक्तिरेताभिरथर्वा भगमेवास्तौत् । तथांत्ययोषोदेवत्ययोपसश्च ॥

---

* ३ । १५ । ३ ऋ० वे० ३ । १८ । ३ में है, वहां इसका ऋषि 'कतो वैश्वामित्रः, है ॥

+ ३ । १५ । ४ का पूर्वार्ध बहुत थोड़े भेद से ऋ० वे० १।३१।१६ में है ॥

× मूल लेखों में 'ष्टुभ' है ॥

÷ ३ । १६ । सूक्त ऋ० वे० ७ । ४१ में यह सूक्त अत्यन्त स्वल्प भेद से आया है । सप्तम मंत्र वहां विना किसी परिवर्तन से है । ऋ० वे० में इस सूक्त का ऋषि 'वासिष्ठ' है और प्रथममंत्र का छन्द निचृज्जगती है ॥

३।१७। *१ 'सीरायुञ्जन्ति' इति नवर्चं सीतादेवत्यमानुष्टुभं विश्वामित्रः, सर्वाभिः सीतामेवास्तौत्। प्रथमार्षीगायत्री। २ 'युनक्त सीरा', ५ शुनं सुफालाः', ६ 'घृतेन सीता' इति त्रिष्टुभः। ३ 'लाङ्गलंपवीरवत्' इति पथ्यापंक्तिः। ७ शुनासीर ह' इति विराट्पुरउष्णिक्। ८ सीतेवन्दामहे' इति निचृदिति॥ ६॥

३। १८। +१ 'इमां खनामि' इति वानस्पत्यमानुष्टुभमथर्वानेन सूक्तेन सपत्नीं ×पराणुदत्। बाणपर्णीमौषधिमस्तौत्। ४ उत्तराहम्' इत्यनुष्टुब्गर्भाचतुष्पादुष्णिक्। ६ 'अभितेऽधाम्' इत्युष्णिग्गर्भापथ्यापंक्तिः॥

३। १६। १ 'संशितं मे' इत्यष्टर्चं वैश्वदेवमुत चान्द्रमसमुतेन्द्रमानुष्टुभं वसिष्ठोऽनेन मंत्रोक्तान्देवानभिष्टूयामित्रान् पराणुद-

---

* इस ३।१७ सूक्त का १ मंत्र ऋ० १०।१०१।४। में है। द्वितीय मंत्र ऋ० १०। १०१। ३ में है, देवता विश्वेदेवाः वा ऋत्विज है। दोनों का ऋषि वहां बुधः सौम्यः है। चतुर्थ मंत्र थोड़े भेद से ऋ० ४।५७।७ में और वहां ऋषि वामदेव है। और इसका उत्तरार्ध अथर्व ३। १०। १ में भी आया है। । पंचम मंत्र कुछ भेद से ऋ० ४।५७।८ में आया है। षष्ठ मंत्र विना भेद से ४। ५७।४ में मिलता है, ऋषि वामदेव है। सप्तम कुछ भेद से ऋ० ४। ५७। ५ में है और अष्टम कुछ भेद से ऋ० ४। ५७। ६ में है॥

+ यह सूक्त बहुत स्वल्प भेद से ऋ० वे० १०। १४५ में आता है उस में इस सूक्त का ऋषि 'इन्द्राणी' है॥

× सब मूल लेखों में पाठ "णुदत्यै" है॥

दिति। प्रथमा पथ्याबृहती। ३'नीचैः पद्यन्ताम्' इति भुरिग्बृहती। *७'प्रेता जयता' इति विराडास्तारपंक्तिः। +५'एषामहम्' इति त्रिष्टुप्। ६'उद्धर्षन्ताम्' इति त्र्यवसाना त्रिष्टुप्ककुम्मतीगर्भा षट्पदातिजगती। ×८'अवसृष्टा परापत' इति पथ्यापंक्तिरिति ॥ ७॥

३। २०। ÷१'अयंतेयोनिः' इति दशर्चमाग्नेयमुत मंत्रोक्त देवत्यमानुष्टभं प्रागुक्तर्षिः प्रथमाभ्यां द्वाभ्यां पञ्चम्याचाग्निमभिष्टूय रयिं चाप्रार्थयत्। सप्तभिरितरान् भगादीन्देवानिति। तत्र ६'इन्द्रवायू' पथ्यापंक्तिः। ८'वाजस्य नु' इति विराड्जगती॥

३। २१। १'ये अग्नयः' इति दशर्चमाग्नेयं त्रैष्टुभमन्त्यास्तिस्रो बहुदेवत्याः। सप्तभिः प्रथमाभिरग्निमस्तौत्पराभिस्तिसृभिर्मन्त्रोक्तान्देवानिति। प्रथमा पुरोऽनुष्टप्। ५'यं त्वा होतारम्' इति जगती। ७'दिवं पृथिवीम्' इति विराड्गर्भा। ·|· ६'उक्षान्नाय'

---

* थोड़े भेद से यह मंत्र ऋ० १०। १०३। १३ में है, वहां ऋषि अप्रतिरथ ऐन्द्रः है॥

+ Whitney ने अपने भाष्य में पञ्चम मंत्र का छन्द नहीं दिया॥

× थोड़े भेद से यह मंत्र ऋ० ६। ७५। १६ में आता है. वहां ऋषि 'पायुर्भारद्वाज' है॥

÷ इस ३।२० सूक्त का १ मंत्र थोड़े भेद से ऋ० ३।२६।१० में है इसका ऋषि विश्वामित्र है। शेष २—७ मंत्र ऋ० १०। १४१ में थोड़े भेद से आते हैं। सप्तम मंत्र में भेद बिलकुल नहीं। इनका ऋषि 'अग्निस्तापसः है॥

·|· यह मंत्र ऋ० ८। ४३। ११ में कुछ भेद से आया है॥

इत्युपरिष्टाद्विराड्बृहती । ८‘हिरण्यपाणिं, २‘यः सोमे’ इति, ३‘य इन्द्रेण’ इति भुरिजः । ६‘शान्तो अग्निः’ इति द्वे अनुष्टुभौ। पूर्वानिचृदिति ॥ ८ ॥

३ । २२ । १‘हस्तिवर्चसम्’ इति बार्हस्पत्यमुतवैश्वदेवमानुष्टुभं वर्चस्यं सर्वान्देवान् वर्चोऽप्रार्थयदिति प्रागुक्तर्षिः । प्रथमाविराट्त्रिष्टुप् । ३‘येन हस्ती’ इति पंचपदापरानुष्टुप्-विराडति जगती । ४‘यत्ते वर्चः’ इति त्र्यवसाना षटपदाजगती ॥

३ । २३ । १‘येन वेहद्’ इति चान्द्रमसमुतयोनिदेवत्यमानुष्टुभं ब्रह्मानेन पुत्रमप्रार्थयद्योनिमभिष्टूय प्रजाया इति । ५‘कृणोमि ते प्राजापत्यम्’ इत्युपरिष्टाद्भुरिग्बृहती । ६‘यासां द्यौः’ इति स्कन्धोग्रीवीबृहती ॥

३ । २४ । १‘पयस्वतीः’ इति सप्तर्चं वानस्पत्यमानुष्टुभं भृगुरुतप्राजापत्यं मंत्रोक्ता अस्तौद्देवता इति । २‘वेदाहम्’ इति निचृत्पथ्यापंक्तिः ॥

३ । २५ । १‘उत्तुदस्त्वा’ इति मैत्रावरुणमानुष्टुभं कामेषुदेवताकं च ततोऽनेन मंत्रोक्तान्देवानस्तौत्, जायाकामश्चस्ववशायतामिति ॥ ६ ॥

३ । २६ । १‘ये स्यां स्थ प्राच्याम्’ इति द्वे रौद्रे, पूर्वं त्रैष्टुभमुत्तरमाष्टिकमथर्वा प्रत्यृचमग्न्यादि बहुदेवत्ये च। पूर्वया प्राचीस्थान् साग्नीन्हेतिनाम्नोदेवानस्तौदिति । द्वितीयया दक्षिणस्थान् सकामानाविष्यवनाम्नो देवान्, परया प्रतीचीस्थान् वैराजनाम्नो

व्युक्रान्देवान्, परयोदीचीस्थान् सवातान् प्रविध्यन्तनाम्नो देवान्, परया ध्रुवस्थान् निलिम्पनाम्नोदेवान् सौषधिकान्, परयोर्ध्वस्थान् अवस्वन्त नाम्नोदेवान् बृहस्पतियुक्तान्, सर्वा ऋचः पूर्वस्य प्रत्येकं पंचपदा विपरीतपाद *लक्ष्मा भवन्ति । पूर्वात्रिष्टुप् । तृतीयाचतुर्थ्यौभुरिजौ । द्वितीया पञ्चम्यांत्या जगत्यौ । द्वितीयस्य पूर्वया प्राचींदिशमाग्निमासितामादित्यामस्तौत्, द्वितीयया दक्षिणामिन्द्रं तिरश्चिराजिंपितॄँस्तृतीयया प्रतीचीं वरुणं पृदाकुमन्नं, परयोदीचीं सोमं स्वजमशनिं, परया ध्रुवां विष्णुं कल्माषग्रीवं वीरुधः, परयोर्ध्वं बृहस्पतिश्चित्रं वर्षमिति ॥ १० ॥

अस्यापि षट् प्रत्येकं पञ्चपदा अष्टयस्तत्र द्वितीययात्यष्टिः । पञ्चमी भुरिगेकैकं ककुम्मतीगर्भा द्वे इति ॥

३।२८। १'एकैकयैषा' इति यामिन्यमानुष्टुभं ब्रह्मानेन यमिनीमस्तौत्, पशु पोषणायेति । प्रथमातिशक्करीगर्भा चतुष्पदाति जगती । ४'इह पुष्टिः' इति यवमध्या विराड्ककुप् । ५'यत्रा सुहार्दः' इति त्रिष्टुप् । ६'यत्रा सुहार्दाम्' इति विराड्गर्भाप्रस्तारपंक्तिः ॥

३ । २६ । १'यद्राजानः' इत्यष्टर्चं शितिपादमाविदेवत्यमानुष्टुभमुद्दालकोऽनेन षडर्चेन शितिपादमविमस्तौत् । सप्तमी कामदेवत्या तयाकामं । ८'परा भौमा तया भूमिमिति । प्रथमातृतीये पंथ्यापंक्ती । ७'क इदम्' इति त्र्यवसाना षट्पादुपरिष्टादै-

* ङ यक्ष्मा ॥

वीबृहती ककुम्मतीगर्भाविराड्जगती । ८'भूमिष्ट्वा' इत्युपरिष्टाद्बृहतीति ॥ ११ ॥

३ । ३० । १'सहृदयम्' इति सप्तर्चं चान्द्रमसं सांमनस्यमानुष्टुभमथर्वानेन दम्पत्योः समीकरणाय सांमनस्यमविद्वेषमस्तौदिति । ५'ज्यायस्वन्तः' इति विराड्जगती । ६'समानी प्रपा'इति प्रस्तारपंक्तिः । ७'सध्रीचीनान्वः' इति त्रिष्टुप् ॥

३ । ३१ । १'वि देवाः' इत्येकादशर्चं पाप्महादेवत्यमानुष्टुभं ब्रह्मानेन सूक्तेन मंत्रोक्तान्देवान् *पाप्मघ्नास्तौत् । ४'वी मे' इति भुरिक् । +५'त्वष्टा दुहित्रे' इति विराट्प्रस्तारपंक्तिरिति ॥ १२ ॥

---

* ङ पाप्मघ्न्या ॥

+ कुछ भेद से यह मंत्र ऋ० १० । १७ । १ में आता है । वहां ऋषि देवश्रवायामायन है ॥

*अथ चतुर्थं काण्डम् ।

४।१। १'ब्रह्म जज्ञानम्' इति काण्डं सप्तर्चं सूक्तं प्रकृतिरन्याविकृतिरित्यवगच्छेत् । १'ब्रह्म जज्ञानम्' इति वेनो बार्हस्पत्यमुतादित्यदैवतम् ॥

४ । २ । +'१य आत्मदा' इत्यष्टर्चमात्मदैवतमुभे त्रैष्टुभे भवतस्तां तां देवतां द्वाभ्यामस्तौत् । ४ । १ । २'इयं पित्र्या', ४ । १ । ५'स बुध्न्यात्' इति । ६'आपो अग्रे' इति पुरोऽनुष्टुप् । ८'आपो वत्सम्' इत्युपरिष्टाज्ज्योतिरिति ॥

४ । ३ । १'उदितः' इति रौद्रमुतव्याघ्रदेवत्यमानुष्टुभमथर्वानेन मंत्रोक्तं व्याघ्रमस्तौत् । प्रथमा पथ्यापंक्तिः । ३'अचयौ च ते' इति गायत्री । ७'यत्संयमः' इति ककुम्मतीगर्भोपरिष्टाद्बृहती ॥

४ । ४।१'यां त्वा' इत्यष्टर्चं वानस्पत्यमानुष्टुभमनेन मंत्रोक्तां उच्छुष्मौषधिं खात्वास्तौदिति च । ४'उच्छुष्मौषधीनाम्' इति पुरउष्णिक् । ६'अद्याग्ने' इति बहुदेवत्ये इमे द्वे भुरिजौ पुरोष्णिक् ॥

---

* यह लेख हमारा है ॥

+ थोड़े भेद से यह सूक्त मंत्र (८) के विना ऋ० १० । १२१ । में आया है, वहां ऋषि 'हिरण्यगर्भः प्राजापत्यः' है और देवता 'कः' है ॥

४ । ५ । *१'सहस्र शृङ्गः' इति ब्रह्मा स्वापनं वार्षभमानुष्टुभं । २'न भूमिम्' इति भुरिक् । ७'स्वप्न स्वप्ना' इति पुरस्ताज्ज्योतिस्त्रिष्टुबिति ॥ १३ ॥

४ । ६ । १'ब्राह्मणो जज्ञे' इति द्वे सूक्ते पूर्वमष्टर्चं गरुत्मान् तक्षकदेवत्यमुत्तरं वानस्पत्यमानुष्टुभे द्वाभ्यां मंत्रोक्तदेवता अस्तौत् ॥

४ । ७ । १'वि ते मदम्' इति स्वराट् ॥

४ । ८ । १'भूतो भूतेषु' इति राज्याभिषेक्यं चान्द्रमसमाप्यमानुष्टुभमथर्वांगिरा मंत्रोक्ता देवता अनेनास्तौत् । आद्या भुरिक्त्रिष्टुप् । ३'आतिष्ठन्तम्' इति त्रिष्टुप् । ७'एना व्याघ्रम्' इत्याद्या, ५'या आपः' इति विराट्प्रस्तारपंक्तिरिति ॥

४ । ९ । १+'एहि जीवम्' इति दशर्चं भृगुस्त्रैककुदांजन दैवतमानुष्टुभमनेन सूक्तेन तदेवांजनं बहुधास्तौत् । २'परिपाणम्' इति ककुम्मती, परापथ्यापंक्तिरिति ॥ १४ ॥

४ । १० । १'वाताज्जातः' इति शंखमणिसूक्तं तद्दैवतमानुष्टु-

---

* इस ४ । ५ सूक्त के १,३,५,६ मंत्र ऋ० ७ । ५५ । में क्रम से ७, ८, ६, ५ में थोड़े भेद से आये हैं, वहां ऋषि वसिष्ठ और देवता इन्द्र है ॥

+ इस सूक्त के सप्तम मंत्र का उत्तरार्ध स्वल्प भेद से ऋ० १० । ६७ । में आता है ॥

भमथर्वाभिः कृशनमस्तौत्। *६ 'हिरण्यानाम्' इति पंथ्यापंक्तिः। ७ 'देवानामस्थि' इति पञ्चपदा परानुष्टुपशक्करीति ॥

४। ११। १ 'अनड्वान्दाधार' इति द्वादशर्चं भृग्वंगिरा आनुडुहं त्रैष्टुभं तां देवतामिन्द्ररुपेणैवास्तौदिति। प्रथमाचतुर्थ्यौ जगत्यौ। द्वितीयाभुरिक्। ७ 'इन्द्रो रूपेण' इति त्र्यवसानाषट्पदा-नुष्टुब्गर्भोपरिष्टा +जागतानिचृच्छक्करी। ८ 'मध्यमे तदनुडुहः' इति पंचानुष्टुभ इति ॥ १५ ॥

४। १२। १ 'रोहिण्यसि' इति वानस्पत्यमानुष्टुभमृभुर्मन्त्रो-क्तां देवतामस्तौदिति। प्रथमात्रिपदागायत्री। ६ 'स उत्तिष्ठ' इति त्रिपदा यवमध्या भुरिग्गायत्री। ७ 'यदि कर्त्तम्' इति बृहतीति ॥

४। १३। ×१ 'उत देवा' इति चान्द्रमसमुत वैश्वदेवमानु-ष्टुभं शंतातिरनेन मंत्रोक्तान् विश्वान् देवानस्तौदिति ॥

---

* बी. के विना क. ख. ग. ङ. में हिरण्यानाम् के स्थान में 'अग्नि-र्हिरण्यानाम्' पाठ आया है बी. में पाठ मूल वेदवत् है। किसी भी मूलवेद में 'हिरण्यानां' के पूर्व 'अग्निः' पद नहीं है, यदि 'अग्नि' पद पूर्व लगावें तो पथ्यापंक्तिः छन्द नहीं बनता अब क्या कभी मूल संहिता में यह पद पूर्व था अथवा कुछ और बात थी इसका निर्णय करना अत्यन्त कठिन है ॥

+ ङ. जागती ॥

× यह सूक्त छटे मंत्र के विना ऋ० १०। १३७ में आता है। वहां इस के ऋषि एक २ ऋचा वाले सात हैं। 'सप्त ऋषय एकर्चाः'। छटा मंत्र १०। ६०। १२ में है ऋषि बन्ध्वादयो गौपायनः, देवता हस्तः ॥

४ । १४ । १'अजोहि' इति नवर्चं भृगराज्यमाग्नेयं त्रैष्टुभम् तावानेनास्तौत् । २'क्रमध्वमग्निना' ४' स्वर्यन्तः' इत्यनुष्टुभौ । ३'पृष्ठात् पृथिव्याः' इति प्रस्तारपंक्तिः । ७'पञ्चौदनं । ६ शृतमजम्' इति जगत्यौ । ८ 'प्रतीच्यां दिशि' इति पञ्चपदाति शक्वरीति ॥ १६ ॥

४ । १५ । १'समुत्पतन्तु' इति षोडशर्चमथर्वा मरुत्पर्जन्यदेवत्यं त्रैष्टुभं प्रथमया प्रथमं सर्वा दिशोऽस्तौत्। पराभ्यां वीरुधश्च, परया मारुतपर्जन्यान्, परया मरुतः, परया प्रजापतिस्तनयित्नुनासहाह्वयत् । परया वरुणं तिसृभिरततोमण्डूकान् पितॄँश्च परया वातमप्रार्थयत् । आद्ये द्वे, ५'उदीरयत' इति विराड्जगत्यौ। १०'अपामग्निः' इति भुरिक् । ४'गणास्त्वा' इति विराट्पुरस्ताद्बृहती । ७'सं वो ऽवन्तु' इति, *१३'संवत्सरं शशयाना' इति द्वे अनुष्टुभौ । ६'आपो विद्युत्' इति पथ्यापंक्तिः । १२'अपो निषिञ्चन्' इति पंचपदानुष्टुब्गर्भा भुरिक् । १५'खण्वखा इखैमखा' इति शंकुमत्यनुष्टुब्गिति ॥ १७ ॥

४ । १६ । १'बृहन्नेषाम्' इति सत्यानृतोऽन्वी+चणसूक्तं नवर्चं ब्रह्मा वारुणं त्रैष्टुभमाद्यश्चतसृभिर्दिव्यसा देवविज्ञानमकरोत् परया वरुणेरणं, पराभ्यां वरुणप्रार्थनं,ततोद्वाभ्यां वरुणोक्तिरिति ।

---

* यह ४ । १५ । १३ मंत्र ऋ० ७ । १०३ । १ में आया है । वहां इसका ऋषि वसिष्ठ और देवता मण्डूक है ॥

+ क. ख. ग. ङ. वीचक्षण ॥

४ । । १६ । प्रथमानुष्टुप् । ८ 'यः समाभ्यः' इति त्रिपान्महाबृहती । ६ 'तैस्त्वा' इति विराएनाम त्रिपाद्गायत्री । ५ 'सर्वं तद्राजा' इति भुरिक्, 'शुतेन पाशैः' इति जगतीति ॥

४ । १७ । १ 'ईशानां त्वा' इति चतुर्विंशर्चं त्रयं सूक्तानां शुक्रोऽपामार्गं वनस्पतिदेवत्यमानुष्टुभं सर्वाभिरपामार्गवीरुधमस्तौत् । ततः कृत्यामशमत् । १८ । ६ 'यश्चकार न शशाक' इति बृहतीगर्भा । १६ । २ 'ब्राह्मणेन पर्युक्तासि' इति पथ्यापंक्तिरिति ॥१८॥

४ । २० । १ 'आ पश्यति' इति नवर्चं मातृनामा ऋषिर्मातृनामादैवतमानुष्टुभमनेनौषधिमेवास्तौत् । प्रथमा स्वराट् । अंत्या भुरिक् इति ॥

४ । २१ ।*१ 'आ गावः' इति ब्रह्मगव्यं त्रैष्टुभमनेन गावोऽस्तौदिति । २ 'इन्द्रो यज्वने' इति तिस्रो जगत्य इति ॥

४ । २२ । १ 'इममिन्द्रवर्धय' इति वसिष्ठ ऐन्द्रं त्रैष्टुभम+थर्वा क्षत्रियाय राज्ञे चन्द्रमसे प्रथमाभिः पञ्चाभिः निरमित्रीकरणं मुख्येनेन्द्रमप्रार्थयत् । ग्रामगवाश्वादि सर्वं राज्योपकरणं च ततः पराभ्यामन्त्याभ्यामिन्द्रो ×रूपेण स्वयमेव ÷क्षत्रियराजानं चन्द्रमसमाशिषा प्राणुददिति ॥ १६ ॥

---

* यह ४।२१ सूक्त ऋ० ६।२८।१–७ में है वहां ऋषि भरद्वाज वार्हस्पत्य है ॥

+ ह्वि० त्रैष्टुभं सोऽथर्वा ॥

× ह्वि० इन्द्र रूपेण ॥

÷ ह्वि० क्षत्रियं ॥

४ । २३ । १'अग्नेर्मन्वे' इति सप्त मृगारसंज्ञकानि सूक्तानि भृगारो नाना देवत्यानि त्रैष्टुभानि । ततः १'अग्नेर्मन्वे' इत्यनेन प्रथमं प्रचेतसमाग्निमस्तौत् ॥

४ । २४ । १'इन्द्रस्यमन्महे' इति इन्द्रं ॥

४ । २५ । १'वायोः सवितुः' इति वायुसवितारौ ॥

४ । २६ । १'मन्वे वां द्यावापृथिवी' इति द्यावापृथिव्यौ ॥

४ । २७ । १'मरुतां मन्वे' इति मरुतो देवान् ॥

४ । २८ । १'भवाशर्वौ मन्वे वाम्' इति भवशर्वावुतरौद्रमथर्वा ॥

४ । २९ । १'मन्वे वां मित्रावरुणौ' इति मित्रावरुणौ-तन्मिषतः परानृषीनित्युत द्रुह्वणस्तत्र २३ । ३'यामन्यामन्' इति पुरस्ताज्ज्योतिष्मती । २३ । ४'सुजातं जातवेदसम्' इत्यनुष्टुप् । ६'येन देवाः' इति प्रस्तारपंक्तिरिति । २४ । १'इन्द्रस्य मन्महे' इति शाक्करीगर्भापुरःशक्करी । २५ । ३'तव व्रते' इत्यतिशक्करी । २६ । १'मन्वे वां द्यावापृथिवी' इति पराऽष्टिरित्युभेजगत्यौ । २५ । ७'उप श्रेष्ठा नः' इति पथ्याबृहती । २८ । १'भवाशर्वौ मन्वे वाम्' इति द्व्यतिजागतगर्भाभुरिक् । २९ । ७'यन्मेदम्'इति शाक्करगर्भातिमध्येज्योतिः । २९ । ७'ययोः रथः' इति शाक्करीगर्भाजगतीति । सर्वेषां शृंगाणां सर्वासंगत्यैवमेकोनपंचाशत् परानुष्टुभ इति ॥ २० ॥

४ । ३० । *१ 'अहं रुद्रेभिः' इत्यष्टर्चमथर्वा वाग्देवत्यं त्रैष्टुभं स्वयमेवाहंमितिवाचंसर्वरूप सर्वात्मिकांसर्वदेवमयीमित्यस्तौत् । ६ 'अहं सोमम्' इति जगती ॥

४ । ३१ । †१ 'त्वया मन्यो' । ४ । ३२ । १ 'यस्ते मन्यो' इति द्वे ब्रह्मा स्कन्दोमन्युर्दैवते त्रैष्टुभे आभ्यांसेनान्योजयेन्मन्युः सूक्तमस्तूयत् । ३१ । २ 'अग्निरिव मन्यो' । ३१ । ४ 'एको बहूनाम्' इति भुरिजौ ३१ । ५ 'विजेष कृत्' इति तिस्रः ॥

४ । ३२ । ‡१ यस्ते मन्यो' इति जगती ॥

४ । ३३ । §१ 'अप नः शोशुचत्' इति ब्रह्मा पाप्मत्यमाग्नेयमष्टर्चं गायत्रम् ॥

४ । ३४ । १ 'ब्रह्मास्य' इत्यष्टर्चमथर्वा । ब्रह्मास्यौदनं त्रैष्टुभं ४ 'विष्टारिणम्' इत्युत्तमा भुरिक् । ५ 'एष यज्ञानाम्' इति, त्र्यवसाना सप्तपाद कृतिः । ६ 'घृतह्रदा' इति पञ्चपदातिशक्करी । पराभुरिक् शक्करी । ८ इममोदनम्' इति जगती ॥

---

* यह सूक्त ऋ० १० । १२५ में है । वहां ऋषि वागाम्भृणी और देवता भी वागाम्भृणी है ॥

† यह सूक्त ऋ० १० । ८४ में है । वहां ऋषि मन्युस्तापसः है

‡ यह सूक्त ऋ० १० । ८३ में है इस का भी ऋषि ३१ सूक्त वाला है ॥

§ यह सूक्त ऋ० १ । ९७ में है । ऋषि कुत्स आङ्गिरस है ॥

४ । ३५ । १ 'यमोदनम्' इति प्रजापतिरा*तिमार्त्यं त्रैष्टुभं । ३ 'यो दाधार' इति भुरिक् जगतीति ॥

४ । ३६ । १ 'तान्त्सत्यौजाः' इति चातनः †सत्यौजसमाग्नेयमानुष्टुभं । ९ 'ये मा क्रोधयन्ति' इति भुरिगिति ॥ २१ ॥

४ । ३७ । १ 'त्वया पूर्वम्' इति द्वादशर्चं बादरायणिरजश्रृंग्यप्सरोदेवत्यमानुष्टुभम् । प्रथमाभ्यां द्वाभ्यामोषधिमस्तौत् । पराभिस्तिसृभिरप्सरसः, परयौषधिं, पराभिः षड्भिर्गन्धर्वाप्सरौषधिरिति । ३ 'नदीं यन्तु' इति त्र्यवसाना षट्पदात्रिष्टुप् । ५ 'यत्र वः प्रेङ्खा' इति प्रस्तारपंक्तिः । ७ 'आ नृत्यतः' इति परोष्णिक् । ११ 'श्वेवैक' इति षट्पदाजगती, परया निचृदिति ॥

४।३८। १ 'उद्भिन्दतीम्' इति द्वि देवत्यमानुष्टुभम् । सोऽक्षे-विदेवनायाद्याभिश्चतसृभिरप्सरामाह्वयत् । पराभिस्तिसृभिर्वाजिनीवंतमृषभमस्तौत् । ३ 'यायैः परि' इति षट्पदा त्र्यवसाना जगती । तथा ५ 'सूर्यस्य रश्मीन्' इति भुरिगत्यष्टिः । ६ 'अन्तरिक्षेण' इति पूर्वात्रिष्टुबुत्तरा त्र्यवसाना पञ्चपदानुष्टुब्गर्भा पुरउपरिष्टाज्ज्योतिष्मती जगतीति ॥ २२ ॥

४ । ३९ । १ 'पृथिव्यामग्नये' इति दशर्चमंगिराः सान्नत्यं नानादेवत्यं । पांक्तं तथान्त्ये द्वे आग्नेयौ त्रैष्टुभौ । तत्र प्रथमाभ्यां

---

* द्वि० आतिमर्त्यम् E. । द्वि आतिमर्त्यम् Br. ॥

† द्वि० सात्यौजसम् ॥

द्वाभ्यां पृथिव्यग्नी स्तुत्वाप्रार्थयत्। पराभ्यां वाय्वन्तरिक्षे, पराभ्यां दिवादित्यौ, पराभ्यां दिक्चन्द्रमसस्ततः, पराभ्यां ब्रह्मा जातवेदसमग्निं प्रार्थ्यायजदिति । १‘पृथिव्याम्’, ३‘अन्तरिक्षे’, ५‘दिवि’, ७‘दिक्षु’ इति त्रिपादा महाबृहत्यः। २ पृथिवी’, ४‘अन्तरिक्षं’, ६‘द्यौः’, ८‘दिशः एताश्चतस्रः संस्तारपंक्तयः ॥

४ । ४० । १‘ये पुरस्तात्’ इति कृत्याप्रतिहरण*मष्टर्चं शुक्रो बहुदेवत्यं त्रैष्टुभम्। प्रथमया प्राच्यमग्निमस्तौत्, द्वितीयया दक्षिणस्यां यमं, तृतीयया प्रतीच्यां वरुणं, परयोत्तरतः सोमं, परयाधस्ताद्भूमिं, परयान्तरिक्षे वायुं, परयोपरिष्टात्सूर्य्यं, ततो दिगन्तर्देशेभ्यः सर्वत्र ब्रह्मेति ब्राह्मणं सर्वत्र। जातवेद आभिमुख्येनास्तौत्। २‘ये दक्षिणतः । ८‘ये दिशामन्तर्देशेभ्यः’ इति जगत्यौ। द्वितीयया पुरोऽति शक्करी पादयुगिति ॥ २३ ॥

इति ब्रह्म वेदोक्त मंत्राणां बृहत्सर्वानुक्रमणिकायां द्वितीयः पटलः समाप्तः ॥

---

* द्वि० के Br. लेख में अष्टर्चं हैं दूसरे E. में नहीं ॥

+अथ पञ्चमं काण्डम्।

ॐ अथैवं वक्ष्यमाणमंत्रेषु सूक्तप्रकृति*सार्षिछन्दोदैवतेष्व-
वगच्छेत् सर्वत्रेति ॥

५।१।†१'ऋधङ् मन्त्रः॥

५।२।‡१'तदिदास' इति द्वे वारुणे त्रैष्टुभे॥

५।३।§१'ममाग्ने वर्चः' इत्याग्नेयं, पूर्वे नवके, परमेका-
दशकं ‖त्रैष्टुभं। बृहद्दिवोऽथर्वा प्रथमस्या ¶पराबृहती त्रिष्टुबंत्या
त्र्यवसाना षट्पदात्यष्टिः।१०'ये नःसपत्नाः' इति विराड्जगती।
५।१।७'उतामृतासुः' इति विराट्।५।२।९'एवा महान्',
५।३।२'अग्ने मन्युम्' इति भुरिजौ पूर्वापराति जागतौ।उरु

+ यह लेख हमारा है॥

* ङ. सा ऋषि॥

† ५।१ सूक्त का छटा मंत्र ऋ० १०।५।६ में आया है।
वहां इसका ऋषि 'त्रित' और देवता अग्निः है॥

‡ ५।२ यह समग्र सूक्त अत्यन्त स्वल्प भेद से ऋ० १०।१२०
में आया है वहां भी इसका ऋषि 'बृहद्दिव आथर्वणः' है॥

§ ५।३ सूक्त के ७, ११ मंत्रों के विना यह सूक्त ऋ० १०।१२८
में स्वल्प भेद से आया है वहां इसका ऋषि 'विहव्य' और 'विश्वे
देवाः' देवता है॥

‖ क. ख. ग. ङ. त्रिष्टुभं॥

¶ बी. 'प्रथमस्याद्या परा'॥

व्यचा नः पूर्वसूक्तद्वयेन वरुणमस्तौत् । ५ । ३ । १ 'ममाग्ने वर्चः' इति द्वाभ्यामृग्भ्यां विहव्योऽग्निं, पराभ्यां देवान्, परया द्रविणोदादि प्रार्थनं, परा वैश्वदेवी, परा सौमी, तत्परा रौद्री, परे वैश्वदेव्यौ, परमैन्द्रीति च ॥ १ ॥

५ । ४ । १ 'यो गिरिषु' दशकं भृग्वंगिरा यक्ष्मनाशन कुष्ठदेवत्यमानुष्टुभं सर्वाभिः कुष्ठतक्मनाशनं वास्तौत् ६ 'इमं मे कुष्ठ' इति गायत्री । ५ 'हिरण्ययाः पन्थानः' इति भुरिक् । १० 'शीषामयम्' इत्युष्णिग्गर्भानिचृत् ॥

५ । ५ । *१ 'रात्री माता' इति लाक्षिकमानुष्टुभं नवकं ॥

५ । ६ । †१ 'ब्रह्म जज्ञानं' सोमारुद्रीयं चतुर्दशकं त्रैष्टुभमेतदादीनि समिद्धो अंत्यातः प्राचीनान्यथर्वा पूर्वेण लाक्षामस्तौदिति । उत्तरस्याद्यया ब्रह्मादित्यं, द्वितीययाकर्म्माणि, पराभ्यां रुद्रगणान् । ५ 'न्वे इतेन' इति तिसृभिः सोमारुद्रौ । ‡८ 'मुमुक्तम्'

---

* मूल लेखों में लाक्षिमक पाठ है ॥

† ५ । ६ सूक्त का १ मंत्र अथर्व ४ । १ । १ में पहले भी आया है । वहां इस का ऋषि 'वेन' और 'बृहस्पति' और 'आदित्य' है । मंत्र २ अथर्व ४ । ७ । ७ में है । वहां ऋषि 'गरुत्मान्' और देवता तक्षक है । मंत्र ३ स्वल्प भेद से ऋ० ६।७३।७ में है वहां ऋषि 'पवित्र' है । मंत्र ४ ऋ० ६ । ११० । १ में अल्पभेद से आया है । ऋषि 'त्र्यरुणत्रसदस्यू' है ॥

‡ वी. मुमुक्तमस्मानिति ॥

